# शोधसारांशिका

समेषामिहलौकिकपारलौकिकविषयज्ञानस्यस्तित्वं भारतीयज्ञानस्याधारभूतेषु वेदष्वेवान्तर्निहितोऽस्ति इत्यत्र न काचिद्विप्रतिपत्तिप्राचीनार्वाचीनविदुषाम्। वैदिकवाङ्मये मन्त्रेषु, सूक्तेषु, कथानकेषु, उपनिषत्सु, पुराणेषु च विकिर्णतया प्राचीनार्वाचीन-ज्ञानविज्ञानस्य सर्वाणि तत्त्वानि गूढतया गुम्फितानि सन्ति। वेदेषु (ऋग्–यजुः-साम-अथर्वेषु) संस्कृतवाङ्मयेषु (स्मृति-पुराणेषु) च सूर्यादिग्रहाणां नक्षत्राणां ध्रुवागस्त्य-सप्तर्ष्यादीनां ताराणां ज्ञानं स्थानं तत्साधनं प्रयोगाश्च सङ्केतिता वर्तन्ते। **''वेद प्रतिपाद्यप्रयोजनवदर्थो धर्मः''**[१] इत्यादिस्मृतिवाक्यानुरोधेन शुभाशुभकालनिर्धारणाय फलज्ञप्तये च वेदानां नेत्रपदरूढं खगोलज्ञानाश्रितं ज्योतिःशास्त्रं ब्रह्मणा प्रवर्त्तितम्। यथाह नारदः-

**सिद्धान्त संहिता होरा रूपस्कन्धत्रयात्मकम्।**
**वेदस्य निर्मलं चक्षुः ज्योतिःशास्त्रमनुत्तमम्।।**[२]

शास्त्रानुसारेण शास्त्रस्यास्य मूलप्रयोजनं यागार्थं शुभकालनिदर्शनं लोके शुभाशुभफलविवेचनञ्च एतत्सर्वं ग्रहस्पष्टाधारेणैव सिद्ध्यति अत एव आचार्यभास्करेण स्पष्टतयोक्तं यत्-

**ज्योतिः शास्त्रफलं पुराणगणकैरादेश इत्युच्यते।**
**नूनं लग्नबलाश्रितं पुनरयं तत्स्पष्टखेटाश्रयम्।।**[३]

---

१. अर्थसंग्रहः पृ.१

२. ना.सं., श्लो.४

३. सि.शि., गो.अ., गोलप्रशंसा-श्लो.६

अत्र आदेशो हि भूतभविष्यवर्तमानप्रतिपादनाय प्रयुज्यते। अथ च आचार्यभास्करस्य ''यात्राविवाहोत्सवजातकादौ'' स्मरणेन स्पष्टतया ज्ञायते यद् स्पष्टाधिकारोक्तैः संस्कारैः संस्कृताः ग्रहा एव स्फुटं फलं सूचयन्ति। परन्तु अनया रीत्याऽऽनीता ग्रहा अपि दृक्सिद्धाः न भवन्ति यतोहि दृक्सिद्धास्तु विमण्डलीयाः भवन्ति परन्तु फलार्थं स्पष्टीकरणेन क्रान्तिवृत्तीयाः ग्रहाः सिद्ध्यन्ति। अत एव दृक्सिद्ध्यर्थं स्पष्टाधिकारोक्त स्पष्टीकरणादनन्तरं कतिचिदन्यैः संस्कारविशिष्टैः संस्कृताः ग्रहा एव उपयुक्ताः भवन्ति। अतोऽत्र दृग्ग्रहसाधनसमीक्षणविषयमवलम्व्य पञ्चसु अध्यायेषु दृक्प्रत्यार्थे केचन नूतनाविषया समावेशिताः। तत्र प्रथमाध्याये ज्योतिषशास्त्रस्य परिचय आदिकालाद् वेदान्निःस्सृतज्योतिषशास्त्रस्य ऐतिह्यनिरूपणपूर्वकं वर्तमानपर्यन्तं का स्थितिः वर्तते इति सम्यक् प्रतिपादयित्वा विषयग्रहणस्यौचित्यं प्रतिपादितं वर्तते।

तत्र प्रथमतया दृग्ग्रहस्य वैशिष्ट्यनिरूपणावसरे दृग्ग्रहस्वरूपस्य चर्चाविशदीकृत्य दृग्ग्रहसाधनस्यावश्यकता व्रतपर्वनयसत्कार्यादिकं सम्पादनाय प्रतिपादिता वर्तते। तत्रैव नव्यानां मतमङ्गीकृत्य ग्रहाणां स्वरूपं वैशिष्ट्यं च प्रतिपादयित्वा किञ्च फलिते ग्रहाणां फलकथनाय स्वरूपमपि प्रतिपादितमस्ति।

द्वितीयाध्याये कालस्य महत्वूपर्णसत्तामधिकृत्य ज्योतिषशास्त्रे नवविधकालमानेषु सावनसौरचान्द्रनाक्षत्रमानां विवेचनपूर्वकं व्यवहारयोग्यत्वं समीक्षितं वर्तते। तद्यथा-

**वर्षायनर्तुयुगपूर्वकमत्रसौरान्**
**मासास्तथास्तु तिथयस्तुहिनांशुमानात्।**
**यच्कृच्छसूतकचिकित्सित्वासराद्यं**
**तत्सावनाच्च घटिकादिकमार्क्षमानात्।।**[१]

---

१. सि.शि.ग्र.ग.अ.श्लो.३१

अथ चाहर्गणसाधनपूर्वकं सौरसिद्धान्तोक्तमर्धरात्रिकालिकं (लङ्कायामर्धरात्रिक:) भास्काराचार्यानुसारेण च लङ्कायामौदायिकं ग्रहं कृत्वा उभर्योमतयो: समीक्षा कृता वर्तते। क्रमेऽस्मिन् उभयोर्सिद्धान्तयोर्मध्ये न काचिद्वप्रतिपत्ति अपितु एककालावच्छेदेन एकस्थानावच्छेदेन च ग्रहा: क्षितिजसन्निधिगा: समाना एव आयान्तीति। तत: अहर्गणवशाद् कल्पकुदिनै: कल्पग्रहभगणा: तदाऽहर्गणै: किमिति?

$$\frac{\text{क.ग्र.भ.} \times \text{अ.}}{\text{क.कु.दि.}}$$

लङ्कायां क्षितिजसन्निधिग: मध्यमग्रह आयाति। तत: मध्यमग्रहानयने किञ्चिद् समीक्षणं कृत्वा मध्यमग्रहे के के संस्कारा अपेक्षिता इति विशदिकृतम्। तृतीयाध्याये क्षितिजसन्निधिगता ग्रहाणां क्षितिजेकरणार्थमुदयान्तरस्यावश्यकता दृष्ट्वा मध्यमसावन-स्फुटसावनयोर्मध्येऽन्तरं विगण्य्य तदुत्पन्नासुभि: ग्रहाणां गतिवशाद् कलादिकं मानं विज्ञाय उदयान्तरेण संस्कारेण संस्कृतं मध्यमग्रहं क्षितिजे साधितम्। वस्तुततोऽहर्गणस्य मध्यमसावनेन सिद्धत्वादस्योदयान्तरसंस्कारस्यावश्यकता ग्रहानयने अपरिहार्यरूपेण कृता वर्तते। यथाह भास्कर:-

**अहर्गणो मध्यमसावनेन कृतश्चलत्वात्स्फुटसावनस्य।**
**तदुत्थखेटा उदयान्तराख्यं कर्मोद्भवेनोनयुताफलेन।।**
**लङ्कोदयैर्स्युर्न कृतास्तदाद्यै: यतोऽन्तरं तच्चलमल्पकञ्च।।**[१]

पुनश्च ग्रहणादिदृश्यजन्यकालेन देशान्तरं विगणय्यित्वा देशान्तरसंस्कारं कृत्वा स्व-स्वदेशीया: ग्रहा आयान्तीति। पूर्वोक्तेषु मध्यमग्रहेषु ये संस्कारा: भवन्ति तेषां संस्काराणां समीक्षणं कृत्वा अन्येषां बीजादिसंस्कारणामुपयोगितापि चास्माभि: प्रतिपादिता।

---

१. सि.शि.गो.म.ग.वा.श्लो.१९

अत्र देशान्तरविषये विशेषेण पूर्वापरं देशान्तरं देशान्तरनाम्ना तथा च याम्योत्तरदेशान्तरं चरकर्म नाम्ना संस्क्रियते। अस्मिन्नेव क्रमे मध्यमग्रहे उदयान्तरं, चरकर्मं, भुजान्तरं, अद्बबीजं, रामबीजं, भांशफलञ्च ग्रहस्पष्टीकरणाय संस्क्रियते। चतुर्थाध्याये मध्यमग्रह-स्फुटग्रहयोर्मध्येऽन्तरकारणानि मन्दोच्चं, शीघ्रोच्चं पातञ्च शास्त्रोक्तविधिं स्वीकृत्य मन्दफल-शीघ्रफल-पातादिसंस्काराणां संस्कारविधिः प्रयोगविधिः किं तेषां महत्वञ्चेति विशदिकृतम्। सूर्यस्पष्टीकरणे मन्दफलमेव स्वीकृतम्। केवलेन मन्दफलेन संस्कृतो सूर्यः स्पष्टो भवति। चन्द्रस्पष्टीकरणस्य वैशिष्ट्यनिरूपणावसरे सार्धशताधिक-संस्काराणामावश्यकता दृश्यते। आर्वाचीनविदुषां मतमङ्गीकृत्वा डॉ.मुरारीलालशर्ममहोदयाः सार्धशताधिकसंस्काराणामेकीकृत्य चत्वारिंशत्संस्काराणां महत्वं निर्दिष्टम्, किञ्चास्माभिः चत्वारिंशत्संस्कारेषु पञ्चैव मुख्याः स्वीकृत्य मन्दफलं वेरियेशन (कर्ष), मासिकच्युतिः, पाक्षिकच्युतिः, वार्षिकच्युतिश्च परस्परसंस्कारेषु संस्क्रियते तदा ५ अंश ४ कलाऽऽयाति। ध्यातव्यमिदं भारतीयज्योतिषे सौरसिद्धान्तोक्तमन्दफलं कालभेदेन ४ अंश ५६ कलातः ५ अंश ६ कलापर्यन्तं जायते। अत एव मन्दफलं सौरसिद्धान्तोक्तं वैज्ञानिकत्वं प्रतिभाति। चन्द्रस्य दृक्प्रत्ययार्थे दृक्कर्मस्यापि संस्कारः क्रियते। मन्दफलसाधने मन्दकर्ण-त्रिज्ययोर्मध्ये स्वल्पान्तरं दृष्ट्वा मन्दकर्णसाधनं न कृतम्। सूर्यस्य क्रान्तिवृते भ्रमणत्वाद् दृक्कर्मसंस्कारं न प्रतिपादिमित्याचार्याणां मतमङ्गीक्रियते। अथ च पञ्चमाध्याये शीघ्रपरिधयः सौरसिद्धान्तानुसारेणाङ्गीकृत्य शीघ्रभुजफलसाधनं कृत्वा पुनश्च कक्षावृते करणाय भास्करमतानुसारेण चतुर्विधप्रकारेण शीघ्रकर्णानयनं निर्दिष्ट्वा, शीघ्रकर्णमाध्यमेन यदि शीघ्रकर्णे इदं शीघ्रभुज फलं तदा त्रिज्यया किमिति?

$$\frac{\text{शी.भु.फ.} \times \text{त्रि}}{\text{शी.क.}}$$

वास्तवं शीघ्रफलमायाति। यथोक्तं भगवता सूर्येण-

**त्रिज्याऽभ्यस्तं भुजफलं चलकर्णविभाजितम्।**

**लब्धस्य चापं लिप्तादि फलं शैघ्यमिदं स्फुटम्।।**[१]

अथ च शीघ्रफलसाधनं कृत्वा तत्संस्कारविधिश्च प्रतिपादितम्। प्रथमं शीघ्रफलार्धं, द्वितीयं मन्दफलार्धं, तृतीयं मन्दफलं, चतुर्थमन्तिमञ्च शीघ्रफलमिति। कथं देयं केन प्रकारेण वा एतस्य विषये किञ्चिदुपस्थापितम्। मध्यमग्रहः ± शीघ्रफलार्धम् = शीघ्रफलार्धसंस्कृतग्रहवशात् मन्दफलसाधनं कृत्वा शीघ्रफलार्धसंस्कृतमध्यमग्रहः ± मन्दफलार्धं = शीघ्रफलार्धमन्दफलार्धसंस्कृतं मध्यमग्रहं, एतत् द्वारा पुनश्च मन्दफलसाधनं कृत्वा पूर्वानिताहर्गणवशाद् मध्यमग्रहे ± पूर्णमन्दफलम् = मन्दस्पष्टग्रहा आयान्ति। मन्दस्पष्टग्रहात् शीघ्रकर्णसाधनपूर्वकं शीघ्रफलसाधनं कृत्वा मन्दस्पष्टग्रहः ± शीघ्रफलम् = स्पष्टा ग्रहाः जायन्ते। अत्र गणेशेन त्रयः संस्काराः वर्णिताः[२] शीघ्रफलार्धं प्रथमं द्वितीयं मन्दफलं, तृतीयमन्तिमञ्च शीघ्रफलं किन्तु तदुद्घोषितवाक्यं (दृक्तुल्यसापेक्षं वाक्यं) किञ्चिद् कालान्तरेण शीथिलीभूतो जातः। यतोहि तत्खण्डनं केतकरण कृतम् **''विख्यातं ग्रहलाघवं तदप्यसत्सम्यक् न धत्तेऽधुना''**[३] इति कृत्वा, पुनश्च गुरुशन्योः कृते कर्षसंस्कारस्यावश्यकता वर्णयित्वा विधिश्च प्रतिपादनमभिहितम्। गुरोरिदं परमं कर्षफलं १५ कला ५१ कला स्वीकृत्य तत्साधनं स्पष्टीकरणं च कृतम्। शनेरिदं परमं फलं ३९ कला ३९ विकला इति। एतेषामुदयान्तर-चरान्तर-भुजान्तर-अद्वबीज-रामबीज-भांशफल-

१. सू.सि.स्प.अ.श्लो.४३

२. ग्र.ला.पं.ग्र.स्प.श्लो.९

३. के.ग्र.ग. श्लो.२

संस्काराणां मध्यमग्रहे कृत्वा अनन्तरं मन्दफल-शीघ्रफलाभ्यां संस्काराभ्यां संस्कृतग्रहे पुनश्च कर्षजन्यसंस्कारा: क्रियते। एतत्परं दृक्कर्मसंस्कारं दृक्प्रत्ययार्थं कृतेसति दृक्प्रत्ययकारका: ग्रहा आयान्ति। ग्रहणादिदृश्याकाशीय स्थितिप्रदर्शनानां साधनस्यावसरे दृक्प्रत्ययकारका: ग्रहा अपेक्षिता:। पुनरन्ते भगवत: सूर्यस्य प्रति प्रणतिनतिञ्च प्रणम्य विरम्यते इति दिक्-

**एदते परमं ख्यातं रहस्यं परमाद्भुतम्।**

**ब्रह्मैतत्परमं पुण्यं सर्वपापप्रणाशनम्।।**[१]

---

१. सू.सि.मा.अ.श्लो.१८